# ।। मन्यु सूक्तम् ।।

**ओं ।** यस्ते मन्योऽविधद्वज्र सायक सह ओजः
पुष्यति विश्वमानुषक् । साह्याम दासमार्यं त्वया
युजा सहस्कृतेन सहसा सहस्वता ।। मन्युरिन्द्रो
मन्युरेवास देवो मन्युर्होता वरुणो जातवेदाः । मन्युं
विश ईळते मानुषीर्याः पाहि नो मन्यो तपसा सजोषाः ।।
अभीहि मन्यो तवसस्तवीयान्तपसा युजा वि जहि
शत्रून् । अमित्रहा वृत्रहा दस्युहा च विश्वा वसून्या
भरा त्वं नः ।। त्वं हि मन्यो अभिभूत्योजः स्वयंभूर्भामो
अभिमातिषाहः । विश्वचर्षणिः सहुरिः सहावानस्मास्वोजः
पृतनासु धेहि ।। अभागः सन्नप परेतो अस्मि तव
क्रत्वा तविषस्य प्रचेतः । तं त्वा मन्यो अक्रतुर्जिहीळाहं

स्वा तनूर्बलदेयाय मेहि ।। अयं ते अस्म्युप मेह्यर्वाङ्
प्रतीचीनः सहुरे विश्वधायः । मन्यो वज्रिन्नभि मामा ववृत्स्व
हनाव दस्यूँरुत बोध्यापेः ।। अभि प्रेहि दक्षिणतो भवा
मेऽधा वृत्राणि जङ्घनाव भूरि । जुहोमि ते धरुणं
मध्वो अग्रमुभा उपांशु प्रथमा पिबाव त्वया मन्यो
सरथमारुजन्तो हर्षमाणासो धृषिता मरुत्वः । तिग्मेषव
आयुधा संशिशाना अभि प्र यन्तु नरो अग्निरूपाः ।।
अग्निरिव मन्यो त्विषितः सहस्व सेनानीर्नः सहुरे
हूत एधि । हत्वाय शत्रून् वि भजस्व वेद ओजो
मिमानो वि मृधो नुदस्व ।। सहस्व मन्यो अभिमातिमस्मे
रुजन् मृणन् प्रमृणन् प्रेहि शत्रून् । उग्रं ते पाजो
नन्वा रुरुध्रे वशी वशं नयस एकज त्वम् ।। एको

बहूनामसि मन्यवीळितो विशं विशं युधये सं
शिशाधि । अकृत्तरुत्त्वया युजा वयं द्युमन्तं घोषं
विजयाय कृण्महे ॥ विजेषकृदिन्द्रइवानवब्रवो३ऽस्माकं
मन्यो अधिपा भवेह । प्रियं ते नाम सहुरे गृणीमसि
विद्मा तमुत्सं यत आबभूथ ॥ आभूत्या सहजा वज्र
सायक सहो बिभर्ष्यभिभूत उत्तरम् । क्रत्वा नो
मन्यो सह मेद्येधि महाधनस्य पुरुहूत संसृजि ॥
संसृष्टं धनमुभयं समाकृतमस्मभ्यं दत्तां वरुणश्च
मन्युः । भियं दधाना हृदयेषु शत्रवः पराजितासो
अप नि लयन्ताम् ॥

॥ **ओं** शान्तिः शान्तिः शान्तिः ॥